केन्द्रीय विद्यालयः, कारवारः
विषयः – संस्कृतम्

कक्षा – 10

# अभ्यासप्रश्नपत्रम्

[समय : होरात्रयम्] [पूर्णाङ्काः : 80]

निर्देशः– अस्मिन् प्रश्नपत्रे चत्वारि खण्डानि सन्ति। सर्वेषां प्रश्नानाम् उत्तराणि क्रमानुसारं दीयताम्।

## खण्डः 'क' अपठित-अवबोधनम् (10 अङ्काः)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

एकः निर्धनः ग्रामीणः आसीत्। तस्य द्वे कन्ये आस्ताम्। यदा ते युवत्यौ अभवताम् तदा सः तयोः विवाहम् अकरोत्। ज्येष्ठायाः विवाहः एकेन कुम्भकारेण सह कनिष्ठायाः च विवाहः एकेन कृषकेण सह अभवत्। ते स्वपतिभ्यां सह अगच्छताम् सुखिन्यौ च अभवताम्। एकदा सः ग्रामीणः तयोः मिलितुमगच्छत्। सः तयोः ग्रामं प्रति प्राचलत्। यदा सः ज्येष्ठायाः गृहे अगच्छत् तदा सः अपश्यत् यत् सा प्रसन्ना आसीत् परं सा अकथयत्–हे पितः! वयं प्रसन्नाः स्मः परं जीवनं न सुकरमस्ति। अद्यत्वे काले वर्षा न भवति। यदि समये वर्षा न भविष्यति तर्हि अस्मभ्यं समस्या भविष्यति।

**प्रश्नाः**

**I. एकपदेन उत्तरत–**

(*i*) कनिष्ठायाः विवाहः केन सह अभवत्?
(*ii*) ते स्वपतिभ्यां सह कीदृश्यौ अभवताम्?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) ज्येष्ठा पुत्री पितरं किम् अकथयत्?
(*ii*) ग्रामीणः कस्याः गृहे अगच्छत्?

**III. भाषिककार्यम्–**

(*i*) 'प्राचलत्' इति क्रियापदस्य कर्तृपदं किम्?
(*ii*) 'वयं प्रसन्नाः स्मः' अत्र कः विशेष्यः?
(*iii*) 'दुष्करम्' अस्य पदस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?

**IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।**

## खण्डः 'ख' रचनात्मक-कार्यम् (15 अङ्काः)

**2. भवान् राघवः। भवतां मित्रं सोमेशः साहिबावादनगरस्य 5, शालीमार गार्डन-उपनगरे निवसति। भवतां पितुः स्थानान्तरं शिमलातः दिल्लीनगरे जातम्। भवान् स्वमित्रं कमल-मन्दिरं द्रष्टुम् आमन्त्रयितुम् इच्छति। तदर्थं लिखितं पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत–**

5, सोमविहारः
रामकृष्णपुरम्,
(*i*)..............................
दिनाङ्कः ..................

प्रिय मित्र (*ii*).............................।
नमस्ते।

Scanned by CamScanner

अत्र सर्व कुशलम्। मम (*iii*)............................ स्थानान्तरणम् शिमलातः दिल्लीनगरे सञ्जातम्। (*iv*) .................................... गृहम् अत्र कमलमन्दिरस्य समीपे एव अस्ति। एतत् मन्दिरं (*v*) .......................................... श्वेतपाषाणैः निर्मितम्। भवान् कस्मिंश्चिद् दिने अत्र अगच्छतु। सायं (*vi*) ............................ तत्र सर्वधर्मप्रार्थना (*vii*) ...................................... । वयम् सर्वे मिलित्वा तत्र गमिष्यामः। पितृचरणेषु मम (*viii*) ............................ निवेद्यन्ताम्।

भवतः (*ix*) ...........................

(*x*) ........................... ।

**मञ्जूषा**

| |
|---|
| राघवः, चतुर्वादने, सोमेश, कमलवत्, प्रणामाः, आयोज्यते, प्रियमित्रम्, नवदिल्ली, पितुः, अस्माकम् |

**3. अधोप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया च संस्कृते पञ्च वाक्यानि लिखत–**



**मञ्जूषा**

| |
|---|
| पिता, मातुः, हस्ते, रुग्णः, चिकित्सकः, फलानि, जलपात्रम्, औषधम्, पुत्रः, दुग्धपात्रम्, निरीक्षणम्, करोति |

**अथवा**

**'चिकित्सालयस्य वर्णनम्' इति विषयम् अधिकृत्य मञ्जूषासहायतया च संस्कृते पञ्च वाक्यानि लिखत–**

**मञ्जूषा**

| |
|---|
| रुग्णः, चिकित्सकः, औषधिः, वातावरणम्, शुद्धं भोजनम्, वायुः, प्रातःकाले भ्रमणम्, हितकरम्, स्वास्थ्यम्, प्रतिदिनम्, कर्तव्यम् |

**4. अधोलिखितवाक्यानां संस्कृतभाषयाम् अनुवादं कुरुत–**

(*i*) मानवजीवन सर्वोत्तम जीवन होता है।

(*ii*) छात्रजीवन मानवजीवन की आधारशिला है।

(*iii*) माँ सरस्वती हमारी बुद्धि को प्रेरित करें।

(*iv*) विद्या और तपस्या से आत्मा शुद्ध होती हैं।

(*v*) यज्ञ से देवता प्रसन्न होते हैं।

Scanned by CamScanner

## खण्डः 'ग' अनुप्रयुक्त-व्याकरणम् (25 अङ्काः)

5. निम्नलिखितेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत–

(*i*) मया शिवः + अर्च्यः अस्ति।

(*ii*) सा पत्युर्गृहं गच्छति।

(*iii*) पथिकः वृक्ष + छायाम् अभिलपति।

(*iv*) कज्जलमलिनं धूमं मुञ्चति।

6. रेखाङ्कितपदानां शुद्धं समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत–

(*i*) ह्यः सः सपितृ आसीत्।

(क) पित्रा सह (ख) सह पिता (ग) सम् पिता (घ) पितुः सह

(*ii*) योगी ध्यानमग्नः तिष्ठति।

(क) ध्यानः मग्नः (ख) ध्यानं मग्नः (ग) ध्यानं मग्नम् (घ) ध्याने मग्नः यः सः

(*iii*) ततः तापसौ कुशः च लवः च प्रविशतः।

(क) लवकुशः (ख) कुशलवः (ग) लवकुशौ (घ) कुशलवौ

(*iv*) सः यज्ञाय शालां पश्यति।

(क) यज्ञशाला (ख) यज्ञशालाम् (ग) यज्ञशालायाः (घ) यज्ञशालया

7. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययान् संयोज्य विभज्य वा विकल्पेभ्यः चित्वा लिखत–

(*i*) शीतल + टाप् देवी कुत्र विद्यते?

(क) शीलतः (ख) शीतला (ग) शीतलाम् (घ) शीतलम्

(*ii*) परिश्रमस्य महत्त्वं सर्वे जानन्ति।

(क) महत् + त्व (ख) मह + त्वम् (ग) महा + त्व (घ) मह + त्व

(*iii*) अस्माकं नगरे एकं धर्म + ठक् आयोजनं भविष्यति।

(क) धार्मिकः (ख) धार्मिकम् (ग) धार्मिकी (घ) धर्मः

(*iv*) सौभाग्यवान् भव।

(क) सौभाग्य + क्तवतु (ख) सौभाग्य + मतुप् (ग) सौभाग्य + ठक् (घ) सौभाग्य + त्व

8. वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा रिक्तस्थानानि पूरयत–

(*i*) बालकाः फलानि ...................................।

(क) खादसि (ख) खाद्यते (ग) खादामि (घ) खादन्ति

(*ii*) विद्वान् सर्वैः ...................................।

(क) पूज्यन्ते (ख) पूज्येत (ग) पूज्यते (घ) पूजयन्ति

(*iii*) ................................... क्षेत्रे श्रमं क्रियते।

(क) श्रमिकः (ख) श्रमिकेन (ग) श्रमिकात् (घ) श्रमिकस्य

9. अङ्कानां स्थाने संस्कृते समयं लिखत यत् शिल्पिका कति वादने स्वकार्याणि करोति–

(*i*) शिल्पिका प्रातः (7:15) ................................ प्रातराशं कृत्वा विद्यालयं गच्छति।

(*ii*) विद्यालयात् मध्याह्ने (1:30) ................................ गृहम् आगत्य भोजनं खादति।

Scanned by CamScanner

(*iii*) सायं (5:30) ........................ सा अन्याभिः बालिकाभिः सह खेलति।

(*iv*) सा (9:00) ........................ वादने विश्रामं करोति।

**10. मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत–**

(*i*) ........................ स्वकार्यस्य आरम्भं कुरु।

(*ii*) ........................ वृष्टिः समुद्रेपु।

(*iii*) ........................ दशरथः नाम नृपः आसीत्।

(*iv*) त्वं स्व-पाठं ........................ पठ।

(*v*) रात्रौ कुक्कुराः ........................ भ्रमन्ति।

(*vi*) कक्षायाः ........................ मा गच्छ।

**मञ्जूषा**

| बहिः, अधुना, उच्चैः, वृथा, पुरा, इतस्ततः |
|---|

**11. प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा रेखाङ्कितपदानि संशोध्य लिखत–**

(*i*) रामः मम <u>मित्रः</u> अस्ति।

(क) मित्रेण (ख) मित्रम् (ग) मित्रस्य (घ) मित्राणि

(*ii*) <u>वयं</u> पुष्पोत्सवं पश्यन्ति।

(क) अहम् (ख) ते (ग) त्वम् (घ) यूयम्

(*iii*) पिता <u>पुत्रं</u> स्निह्यति।

(क) पुत्राय (ख) पुत्रे (ग) पुत्रस्य (घ) पुत्रेण

## खण्डः 'घ' पठित-अवबोधनम्

**12. अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–** (30 अङ्काः)

**(अ) गद्यांशः**

आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच-"रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

**I. एकपदेन उत्तरत–**

(*i*) आरक्षी कीदृशः आसीत्?

(*ii*) अभियुक्तः कीदृशः आसीत्?

**II. पूर्णवाक्येन उत्तरत–**

अभियुक्तस्य क्रन्दनं श्रुत्वा प्रसन्नः आरक्षी तं किम् उवाच?

**III. भाषिककार्यम्–**

(*i*) 'प्रस्थितौ' इति क्रियापदस्य कर्तृपदं किम्?

(*ii*) 'प्रसन्नः' इत्यर्थे किं पदं प्रयुक्तम्?

(*iii*) 'सुपुष्टदेहः' इति पदस्य विपरीतपदं गद्यांशे किं प्रयुक्तम्?

Scanned by CamScanner

(ब) पद्यांशः

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।।
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचि...॥

**I. एकपदेन उत्तरत–**

(*i*) जलं कीदृशं न अस्ति? (*ii*) भृशं दूषितं किम् अस्ति?

**II. पूर्णवाक्येन उत्तरत–**

मनुष्यैः किं करणीयम्?

**III. भाषिककार्यम्–**

(*i*) 'अत्यधिकम्' इति पदस्य पर्यायपदं किमस्ति? (*ii*) 'दूषितम्' इति पदस्य विपर्ययपदं किम्?

(*iii*) 'वायुमण्डलम्' इति पदस्य विशेषणपदं किम्?

(स) नाट्यांशः

मयूरः – को न जानाति तव ध्यानावस्थाम्। 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। तव कारणात् तु सर्वं पक्षिकुलमेवावमानितं जातम्।

वानरः – (सगर्वम्) अतएव कथयामि यत् अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।

मयूरः – अरे वानर! तूष्णीं भव। कथं त्वं योग्यः वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः अतः वने निवसन्तं माम् वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु अधुना यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथाकर्तुं क्षमः।

काकः – (सव्यङ्ग्यम्) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

मयूरः – यतः मम नृत्यं तु प्रकृतेः आराधना। पश्य! पश्य! मम पिच्छानामपूर्वं सौन्दर्यम् (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय।

**I. एकपदेन उत्तरत–**

(*i*) 'को न जानाति तव ध्यानावस्थाम्' इति कः कथयति?

(*ii*) केषां सौन्दर्यम् अपूर्वम् अस्ति?

**II. पूर्णवाक्येन उत्तरत–**

वराकान् मीनान् कः कथं च भक्षयति?

**III. भाषिककार्यम्–**

(*i*) 'अहिं भुङ्क्ते' इति पदस्य अर्थे किं पदम् अत्र प्रयुक्तम्?

(*ii*) 'वराकान्' इति विशेषणपदस्य विशेष्यपदं किम्?

(*iii*) 'बहिष्करिष्यामि' इति क्रियापदस्य कर्तृपदं किम्?

**13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(*i*) कविः <u>मानवस्य</u> जीवनस्य कामनां करोति। (*ii*) उपाध्यायदूतः <u>अस्मान्</u> त्वरयति।

(*iii*) वायसः <u>वसन्तस्य</u> गुणं न जानाति। (*iv*) यः <u>निमित्तम्</u> उद्दिश्य प्रकुप्यति।

Scanned by CamScanner

14. **मञ्जूषायाः सहायतया अधोलिखितश्लोकयोः अन्वयं पूरयत–**

**I.** यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः॥

**अन्वयः**–यः (*i*) ............... वित्रस्तान् परैः (*ii*) ............... पीड्यमानान् (*iii*) ............... न रक्षति सः (*iv*) ............... न संशयः।

**मञ्जूषा**

| कृतान्तः, पार्थिवरूपेण, सदा, जन्तून् |
|---|

**II.** वयोबलशरीराणि देशकालाशनानि च।
समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्॥

**अन्वयः**– वयोबलशरीराणि (*i*) ............... व्यायामं च (*ii*) ............... कुर्याद् (*iii*) ............... रोगम् (*iv*) ............... ।

**मञ्जूषा**

| देशकालाशनानि, आप्नुयात्, समीक्ष्य, अन्यथा |
|---|

**अथवा**

**अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत–**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

**भावार्थः**–अस्य भावोऽस्ति यत् सदाचारः जनानां (*i*) ............... धर्मः अस्ति, इति (*ii*) ............... कथयन्ति अतएव जनैः (*iii*) ............... रक्षा प्राणेभ्यः अपि (*iv*) ............... करणीया।

**मञ्जूषा**

| विद्वांसः, विशेषतः, प्रथमः, सदाचारस्य |
|---|

15. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत–**

(*i*) सुरभेः इमाम् अवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।
(*ii*) एकः दुर्बलः बलीवर्दः भूमौ अपतत्।
(*iii*) सा अकथयत् – पुत्रस्य दैन्यं दृष्ट्वा रोदिमि।
(*iv*) तदा तत्र सुराधिपः आगच्छत्।
(*v*) कृषकः तं दुर्बलं बहुधा पीडयति।
(*vi*) स्वपुत्रं दृष्ट्वा सर्वधेनूनां माता सुरभिः रोदिति स्म।
(*vii*) सः बलीवर्दः धुरं वोढुं न शक्नोति।
(*viii*) अयि शुभे! किमेवं रोदिषि?

16. **उचितं मेलनं कुरुत–**

| **पदानि** | **पर्यायपदानि** |
|---|---|
| (*i*) पीडयति | (क) जनन्याः |
| (*ii*) मातुः | (ख) अपतत् |
| (*iii*) पपात | (ग) दुःखीयति |

Geetha 5.10.19.
C.S. GEETHA
TGT (SKT)

Scanned by CamScanner